# श्री मानसादेवी द्वादशनाम स्तोत्रं

**। ओं नमो मानसायै नमः ।**

जरत्कारुर्जगद्गौरी मानसा सिद्धयोगिनी ।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा ॥ 1

जरत्कारुप्रियाऽस्तीकमाता विषहरीती च ।
महाज्ञानयुता चैव सा देवी विश्वपूजिता ॥ 2

द्वादशैतानि नामानि पूजाकालेच यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥ 3

नागभीते च शयने नागग्रस्ते च मंदिरे ।
नागक्षते नागदुर्गे नागवेष्टितविग्रहे ॥ 4

**। फलश्रुति ।**

इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशयः ।
नित्यं पठेद्यस्तं दृष्ट्वा नागवर्गः पलायते ॥ 5

दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ।
स्तोत्रं सिद्धिं भवेद्यस्य स विषं भोक्तुमीश्वरः ॥ 6

नागौघं भूषणं कृत्वा स भवेन्नागवाहनः ।
नागासनो नागतल्पो महासिद्धो भवेन्नरः ॥ 7

॥ इति श्री ब्रह्मवैवर्तमहापुराणे प्रकृतिखंडे पंचचत्वारिंशोध्याये
श्री मानसादेवी द्वादशनाम स्तोत्रं संपूर्णम् ॥

© 2022 Vēdam Nadam